## 19. एकोनविंशः पाठः
## महीशूरपुरं प्रति प्रवासः

क्त्वा / ल्यप्

प्रियमित्र !
कुशली खलु भवान् ? गते सप्ताहे वयं महीशूरपुरं दृष्ट्वा आगतवन्तः ।
प्रवासविस्तरं श्रोतुं भवतः अपि कुतूहलं स्यात् खलु ? अतः विस्तरेण
लिखामि ।

प्रातः वयं सार्धपञ्चवादने विद्यालयं प्राप्य षड्वादने लोकयानम् आरूढवन्तः । प्रयाणसमये अहं पार्श्वासने उपविश्य प्रकृतिसौन्दर्यं दृष्टवान् । घण्टाद्वयात्मकं प्रयाणं कृत्वा वयं श्रीरङ्गपत्तनं प्राप्तवन्तः । तत्र रङ्गनाथमन्दिरं दृष्ट्वा टिप्पूप्रासादं च विलोक्य पक्षिधाम गतवन्तः ।

तत्र विशालः जलाशयः अस्ति । नौकायाम् उपविश्य जलाशये विहारं कृतवन्तः । अध्यापकः एकैकं खगं दर्शयित्वा विवरणं वदति स्म । जलाशये, कारण्डवाः,हंसाः अन्ये खगाः च सञ्चरन्ति । ते अस्मान् दृष्ट्वान भीताः । केचन छात्राः तान् उद्दिश्य पाषाणखण्डान् क्षिपन्ति स्म । नाविकः तान् तर्जयित्वा निवारितवान् । काश्चन बालिकाः अवनम्य मीनान् ग्रहीतुं प्रयत्नं कृतवत्यः । तदा नाविकः नौकां कम्पयित्वा हसितवान् । तदा बालिकाः भीतिं प्राप्य "हो हो" इति क्रन्दनं कृतवत्यः । नाविकः एव ताः समाश्वास्य नौकाम् अग्रे नीतवान् ।

घण्टां यावत् विहृत्य वयं महीशूरपुरं गताः । तस्य नगरस्य आधुनिकं नाम 'मैसूरु' इति । चामुण्डी महिषासुरं मर्दयित्वा लोकं रक्षितवती । अतः तन्नगरस्य नाम 'महीशूरपुरम्' इति जातम् । महीशूरपुरे वयं राजप्रासादं जगन्मोहन-वस्तुसङ्ग्रहालयं च दृष्ट्वा चामुण्डीपर्वतं गतवन्तः । तत्रैव भुक्त्वा किञ्चित् विश्रम्य जन्तुशालां द्रष्टुं गताः ।

सायंकाले वयं 'वृन्दावनं' गताः । वृन्दावनं रमणीयं स्थलम् । जनाः सायंकाले दीपैः अलङ्कृत्य तस्य शोभां वर्धयन्ति । वयं तत्र सुखेन उपविश्य चणकान् खादित्वा शीतलपेयं पीत्वा आनन्देन कालं यापितवन्तः ।

सायं सप्तवादने ततः प्रस्थाय वयं यानम् आरूढवन्तः । प्रवासानुभव अत्युत्तमः आसीत् । तं प्रवासं स्मृत्वा स्मृत्वा इदानीम् अपि आनन्दम् अनुभवामि अहम् । भवतः मातामह्यै मम प्रणामान् निवेदयतु । अन्यान् सर्वान् च यथोचितं कथयतु । पत्रस्य उत्तरं विलिख्य मां तोषयतु ।

भावत्कः
विश्वासः
–

क्त्वान्तरूपाणि        ल्यबन्तरूपाणि

| | |
|---|---|
| पश्यति - दृष्ट्वा | प्राप्नोति - प्राप्य |
| करोति - कृत्वा | उपविशति - उपविश्य |
| दर्शयति - दर्शयित्वा | विलोकते - विलोक्य |
| तर्जयति - तर्जयित्वा | उद्दिशति - उद्दिश्य |
| कम्पयति - कम्पयित्वा | अवनमति - अवनम्य |
| मर्दयति - मर्दयित्वा | समाश्वासयति - समाश्वास्य |
| भुङ्क्ते - भुक्त्वा | विहरति - विहृत्य |
| खादति - खादित्वा | विश्राम्यति - विश्रम्य |
| पिबति - पीत्वा | अलङ्करोति - अलङ्कृत्य |
| स्मरति - स्मृत्वा | प्रतिष्ठते - प्रस्थाय |

ध्यानेन पठन्तु -

यदा एकः कार्यद्वयं करोति तदा पूर्वकार्यवाचकस्य क्रियापदस्य 'क्त्वा' प्रत्ययः भवति ।

उदाहरणम् -

हरीशः खादति । हरीशः विद्यालयं गच्छति । हरीशः खादित्वा विद्यालयं गच्छति ।